॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## श्री राधा स्तोत्र

ॐ नमो भगवते वासुदेवाय

श्रीमद्भागवत रसिक कुटुंब

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्री राधा स्तोत्र

॥ श्री राधा प्रार्थना ॥

राधा साध्यम् साधनं यस्य राधा,
मंत्रो राधा मन्त्र दात्री च राधा।
सर्वं राधा जीवनम् यस्य राधा,
राधा राधा वाचिकिम तस्य शेम् ॥

## श्री राधास्तोत्रम्

गृहे राधा वने राधा, राधा पृष्ठे पुरः(स्) स्थिता ।
यत्र यत्र स्थिता राधा, राधैवाराध्यते मया ॥ 1 ॥

जिह्वा राधा श्रुतौ राधा, राधा नेत्रे हृदि स्थिता ।
सर्वाङ्गव्यापिनी राधा, राधैवाराध्यते मया ॥ 2 ॥

पूजा राधा जपो राधा, राधिका चाभिवन्दने ।
स्मृतौ राधा शिरो राधा, राधैवाराध्यते मया ॥ 3 ॥

गाने राधा गुणे राधा, राधिका भोजने गतौ ।
रत्रौ राधा दिवा राधा, राधैवाराध्यते मया ॥ 4 ॥

माधुर्ये मधुरा राधा, महत्त्वे राधिका गुरुः ।
सौन्दर्ये सुन्दरी राधा, राधैवाराध्यते मया ॥ 5 ॥

राधा रससुधासिन्धु, राधा सौभाग्यमञ्जरी ।
राधा व्रजाङ्गनामुख्या, राधैवाराध्यते मया ॥ 6 ॥

राधा पद्मानना पद्मा, पद्मोद्भवसुपूजिता ।
पद्मे विवेचिता राधा, राधैवाराध्यते मया ॥ 7 ॥

राधा कृष्णात्मिका नित्यं(ङ्), कृष्णो राधात्मको ध्रुवम् ।
वृन्दावनेश्वरी राधा, राधैवाराध्यते मया ॥ 8॥

जिह्वाग्रे राधिकानाम, नेत्राग्रे राधिकातनुः ।
कर्णे च राधिकाकीर्तिर्-मानसे राधिका सदा ॥ 9॥

कृष्णेन पठितं स्तोत्रं, राधिकाप्रीतये परम् ।
यः पठेत् प्रयतो नित्यं, राधाकृष्णान्तिगो भवेत् ॥ 10॥

आराधितमनः(ख्) कृष्णो, राधाराधितमानसः ।
कृष्णाकृष्टमना राधा, राधाकृष्णेति यः(फ्) पठेत् ॥ 11॥

॥ इति ब्रह्माण्डपुराणान्तर्गतं व्यासेदेवविरचितं राधास्तोत्रं सम्पूर्णम् ॥